Semester – II
Paper – CC-4



02/04/2020

# अतिलघूत्तरीया: प्रश्ना:

2 Marks.

१. गीता का?

১. গীতা কা?

उत्तर: विषादक्लिष्टम् अर्जुनं युद्धे पुन: प्रवृत्तकरणाय श्रीकृष्णस्य उपदेशवाणी हि गीता।

উত্তর। বিষাদক্লিষ্টম্ অর্জুনং যুদ্ধে পুনঃ প্রবৃত্তকরণায় শ্রীকৃষ্ণস্য উপদেশবাণী হি গীতা।

२. श्रीमद्भगवद्गीताया: उत्स: क: भवति?

২. শ্রীমদ্ ভগবদ্গীতায়াঃ উৎসঃ কঃ ভবতি?

उत्तर: महाभारतस्य भीष्मपर्व:।

উত্তর। মহাভারতস্য ভীষ্মপর্ব।

३. गीतायां कियन्त: अध्याया: सन्ति?

৩. গীতায়াং কিয়ন্তঃ অধ্যায়াঃ সন্তি?

उत्तर : अष्टादश: अध्याया:।

উত্তর। অষ্টাদশঃ অধ্যায়াঃ।

४. गीताया: श्लोकसंख्या का भवति?

৪. গীতায়াঃ শ্লোকসংখ্যা কা ভবতি?

उत्तर : सप्तशत:।

উত্তর। সপ্তশতঃ।

५. सप्तशती ग्रन्थ: क: भवति?

৫. সপ্তশতী গ্রন্থঃ কঃ ভবতি?

उत्तर : श्रीमद्भगवद्गीता।

উত্তর। শ্রীমদ্ভগবদ্গীতা।

६. गीताया: प्रथमाध्यायस्य नाम किमस्ति?

৬। গীতায়াঃ প্রথমাধ্যায়স্য নাম কিমস্তি?

उत्तर : अर्जुनविषादयोग:।

উঃ অর্জুনবিষাদযোগঃ।

७. गीताया: अन्तिमाध्यायस्य नाम किमस्ति? 2019

৭। গীতায়াঃ অন্তিমাধ্যায়স্য নাম কিমস্তি?

उत्तर : मोक्षसन्न्यासयोगः।

উঃ মোক্ষসন্ন্যাসযোগঃ।

८. गीतायाः चतुर्थाध्यायस्य नाम किमस्ति?

৮। গীতায়াঃ চতুর্থাধ্যায়স্য নাম কিমস্তি?

उत्तर : ज्ञानयोगः।

উঃ জ্ঞানযোগঃ।

९. गीतायाः प्रवक्ता कः भवति?

৯। গীতায়াঃ প্রবক্তা কঃ ভবতি?

उत्तर : पुरुषोत्तमः श्रीकृष्णः।

উঃ পুরুষোত্তমঃ শ্রীকৃষ্ণঃ।

१०. गीतायाः श्रोता कः आसीत्?

১০। গীতায়াঃ শ্রোতা কঃ আসীৎ?

उत्तर : अर्जुनः।

উঃ অর্জুনঃ।

११. 'कृष्णार्जुन-संवादः' कः भवति?

১১। কৃষ্ণার্জুন-সংবাদঃ কঃ ভবতি?

उत्तर : श्रीमद्भगवद्गीता।

উঃ শ্রীমদ্ভগবদ্গীতা।

१२. 'इमं विवस्वते योगम्'—कश्च योगः अत्र उल्लिखितः?

১২। 'ইমং বিবস্বতে যোগম্'—কশ্চ যোগঃ অত্র উল্লিখিতঃ?

उत्तर : निष्कामकर्मयोगः।

উঃ নিষ্কামকর্মযোগঃ।

१३. निष्कामकर्मयोगः केन कस्मै प्रथमं व्याख्यातः?

১৩। নিষ্কামকর্মযোগঃ কেন কস্মৈ প্রথমং ব্যাখ্যাতঃ?

उत्तर : श्रीकृष्णेण विवस्वते सूर्याय।

Scanned with CamScanner

উঃ শ্রীকৃষ্ণেণ বিবস্বতে সূর্যায়।

१४. मनवे कः योगं प्रोक्तवान्?

১৪। মনবে কঃ যোগং প্রোক্তবান্?

उत्तर : विवस्वान् सूर्यः।

উঃ বিবস্বান্ সূর্যঃ।

१५. मनुः कस्मै योगं प्रोक्तवान्?

১৫। মনুঃ কস্মৈ যোগং প্রোক্তবান্?

उत्तर : निजपुत्राय इक्ष्वाकवे।

উঃ নিজপুত্রায় ইক্ষ্বাকবে।

१६. 'एवं परम्परप्राप्तमिमम्'—का च परम्परा?

১৬। 'এবং পরম্পরপ্রাপ্তমিমম্'—কা চ পরম্পরা?

उत्तर : श्रीकृष्णात् सूर्यः. सूर्यात् मनुः, मनोः इक्ष्वाकुः ततः राजर्षयः कर्मयोगं प्राप्तवन्तः। इयं हि कर्मयोगस्य परम्परा।

উঃ শ্রীকৃষ্ণাৎ সূর্যঃ, সূর্যাৎ মনুঃ, মনোঃ ইক্ষ্বাকুঃ ততঃ রাজর্ষয়ঃ কর্মযোগং প্রাপ্তবন্তঃ। ইয়ং হি কর্মযোগস্য পরম্পরা।

१७. योगः नष्टः—योगः कथं नष्टः जातः?

১৭। যোগঃ নষ্টঃ—যোগঃ কথং নষ্টঃ জাতঃ?

उत्तर : मनुष्यानां भोगासक्तेः प्राबल्यात् कर्मयोगः नष्टः जातः।

উঃ মনুষ্যানাং ভোগাসক্তেঃ প্রাবল্যাৎ কর্মযোগঃ নষ্টঃ জাতঃ।

१८. 'परन्तपः' कः आसीत्? 2017

১৮। 'পরন্তপঃ' কঃ আসীৎ?

उत्तर : परान् शत्रून् तापयति यः सः परन्तपः, अर्जुनः।

উঃ পরান্ শত্রূন্ তাপয়তি যঃ সঃ পরন্তপঃ, অর্জুনঃ।

१९. कर्मयोगः कीदृशः?

১৯। কর্মযোগঃ কীদৃশঃ?

उत्तर : पुरातनः अव्ययश्च।

Scanned with CamScanner

উঃ পুরাতনঃ অব্যয়শ্চ।

२०. 'रहस्यं ह्येतदुत्तमम्'—उत्तमं रहस्यं किम्?

২০। 'রহস্যং হ্যেতদুত্তমম্'—উত্তমং রহস্যং কিম্?

उत्तर : निष्कामकर्मयोगः।

উঃ নিষ্কামকর্মযোগঃ।

२१. कर्मयोगः कः भवति?

২১. কর্মযোগঃ কঃ ভবতি?

उत्तरः निष्कामकर्मसम्पादनेन परमात्मना सह जीवात्मनः योगः एव कर्मयोगः।

উত্তর। নিষ্কামকর্মসম্পাদনেন পরমাত্মনা সহ জীবাত্মনঃ যোগঃ এব কর্মযোগঃ।

२२. इन्द्रियाणि केभ्यः पराणिः?

২২. ইন্দ্রিয়াণি কেভ্যঃ পরাণিঃ?

उत्तरः स्थूलपाञ्चभौतिकशरीरेभ्यः।

উত্তর। স্থূলপাঞ্চভৌতিকশরীরেভ্যঃ।

२३. इन्द्रियभ्यः श्रेष्ठं किम्?

২৩. ইন্দ্রিয়েভ্যঃ শ্রেষ্ঠং কিম্?

उत्तर : मनः इन्द्रियेभ्यः श्रेष्ठम्।

উত্তর। মনঃ ইন্দ্রিয়েভ্যঃ শ্রেষ্ঠম্।

२४. मनसस्तु परा का भवति?

২৪. মনসস্তু পরা কা ভবতি?

उत्तर : बुद्धिः मनसः परा।

উত্তর। বুদ্ধিঃ মনসঃ পরা।

२५. बुद्धेः परतः कः भवति?

২৫. বুদ্ধেঃ পরতঃ কঃ ভবতি?

उत्तर : बुद्धेः परतः महान् आत्मा तथा जीवात्मा।

উত্তর। বুদ্ধেঃ পরতঃ মহান্ আত্মা তথা জীবাত্মা।

२६. पुरुषोत्तमः कः भवति?

২৬। পুরুষোত্তমঃ কঃ ভবতি?

Scanned with CamScanner

उत्तर : पुरुषाणाम् उत्तमः पुरुषोत्तमः परमात्मा तथा श्रीकृष्णः।

উঃ পুরুষাণাম্ উত্তমঃ পুরুষোত্তমঃ পরমাত্মা তথা শ্রীকৃষ্ণঃ।

२७. जीवः कस्य अंशभूतः ?

২৭। জীবঃ কস্য অংশভূতঃ?

उत्तर : जीवः परमात्मनः अंशभूतः।

উঃ জীবঃ পরমাত্মনঃ অংশভূতঃ।

२८. 'प्रकृतिस्थानि कर्षति'—प्रकृतिस्थानि कानि ?

২৮। 'প্রকৃতিস্থানি কর্ষতি'—প্রকৃতিস্থানি কানি? 2019

उत्तर : प्रकृतिस्थानि प्रकृतौ सूक्ष्मरूपेण स्थितानि तथा पञ्चज्ञानेन्द्रियाणि (चक्षुः कर्ण-जिह्वा-नासिका-त्वक्) मनश्च।

উঃ প্রকৃতিস্থানি প্রকৃতৌ সূক্ষ্মরূপেণ স্থিতানি তথা পঞ্চজ্ঞানেন্দ্রিয়াণি (চক্ষুঃ-কর্ণ -জিহ্বা-নাসিকা- ত্বক) মনশ্চ।

२९. 'मनः षष्ठानीन्द्रियाणि' —पदेन किं बोध्यते ?

২৯। 'মনঃ ষষ্ঠানীন্দ্রিয়াণি' পদেন কিং বোধ্যতে?

उत्तर : 'मनः षष्ठं येषां तानि तथा श्रोत्रत्वक्चक्षुरसनघ्राणाख्यानि पञ्च इन्द्रियाणि मनश्च।

উঃ 'মনঃ ষষ্ঠং যেষাং তানি তথা শ্রোত্রত্বক্চক্ষুরসনঘ্রাণাখ্যানি পঞ্চ ইন্দ্রিয়াণি মনশ্চ।

३०. 'प्रकृतिस्थानि कर्षति'—कः किं कर्षति ?

৩০। 'প্রকৃতিস্থানি কর্ষতি'—কঃ কিং কর্ষতি?

उत्तर : परमात्मनः अंशः जीवात्मा प्रकृतिस्थानि मनःषष्ठानीन्द्रियाणि कर्षति तथा आकर्षति।

উঃ পরমাত্মনঃ অংশঃ জীবাত্মা প্রকৃতিস্থানি মনঃষষ্ঠানীন্দ্রিয়াণি কর্ষতি তথা আকর্ষতি।

३१. प्रकृतिजः गुणः कतिविधः के च ते ?

৩১. প্রকৃতিজঃ গুণঃ কতিবিধঃ কে চ তে?

उत्तरः प्रकृतिजः गुणः त्रिविधः—सत्त्वं रजः तमश्चेति।

উত্তর। প্রকৃতিজঃ গুণঃ ত্রিবিধঃ—সত্ত্বং রজঃ তমশ্চেতি।

Scanned with CamScanner

३२. 'विषयानुपसेवते'—कः किमुपसेवते?

৩২. 'বিষয়ানুপসেবতে'—কঃ কিমুপসেবতে?

उत्तर: जीवात्मा शब्दादीन् विषयान् उपसेवते।

উত্তর। জীবাত্মা শব্দাদীন্ বিষয়ান্ উপসেবতে।

३३. 'विषयानुपसेवते'—विषयाः के भवन्ति?

৩৩. 'বিষয়ানুপসেবতে'—বিষয়াঃ কে ভবন্তি?

उत्तर : श्रोत्रादीनां पञ्चज्ञानेन्द्रियाणाम् आधारः विषयः। ते यथा —शब्दस्पर्शरूपरसगन्धश्चेति।

উত্তর। শ্রোত্রাদীনাং পঞ্চজ্ঞানেন্দ্রিয়াণাম্ আধারঃ বিষয়ঃ। তে যথা—শব্দস্পর্শরূপরসগন্ধশ্চেতি।

३४. श्रोत्रस्य विषयः कः भवति?

৩৪. শ্রোত্রস্য বিষয়ঃ কঃ ভবতি।

उत्तर : श्रोत्रस्य (कर्णस्य) विषयः शब्दः।

উত্তর। শ্রোত্রস্য (কর্ণস্য) বিষয়ঃ শব্দঃ।

३५. त्वचः विषयः कः भवति?

৩৫. ত্বচঃ বিষয়ঃ কঃ ভবতি?

उत्तर : त्वचः विषयः स्पर्शम्।

উত্তর। ত্বচঃ বিষয়ঃ স্পর্শম্।

३६. चक्षुषः विषयः कः भवति?

৩৬। চক্ষুষঃ বিষয়ঃ কঃ ভবতি?

उत्तर : चक्षुषः विषयः रूपम्।

উঃ চক্ষুষঃ বিষয়ঃ রূপম্।

३७. रसनस्य (जिह्वायाः) विषयः कः भवति?

৩৭। রসনস্য (জিহ্বায়াঃ) বিষয়ঃ কঃ ভবতি?

उत्तर : जिह्वायाः विषयः रसः।

উঃ জিহ্বায়াঃ বিষয়ঃ রসঃ।

३८. घ्राणस्य (नासिकायाः) विषयः कः भवति?

৩৮। ঘ্রাণস্য (নাসিকায়াঃ) বিষয়ঃ কঃ ভবতি?

उत्तर : नासिकायाः विषयः गन्धः।

উঃ নাসিকায়াঃ বিষয়ঃ গন্ধঃ।

३९. 'इयं मे भिन्ना प्रकृतिरष्टधा'—कस्य प्रकृतिः अष्टौ विभाजिता?

৩৯। 'ইয়ং মে ভিন্না প্রকৃতিরষ্টধা'—কস্য প্রকৃতিঃ অষ্টৌ বিভাজিতা?

उत्तर : परमात्मनः तथा श्रीकृष्णस्य प्रकृतिः अष्टधा विभाजिता।

উঃ পরমাত্মনঃ তথা শ্রীকৃষ্ণস্য প্রকৃতিঃ অষ্টধা বিভাজিতা।

४०. 'इयं मे भिन्ना प्रकृतिरष्टधा'—अत्र 'प्रकृति' शब्देन किं बोध्यते?

৪০। 'ইয়ং মে ভিন্না প্রকৃতিরষ্টধা'—অত্র 'প্রকৃতি' শব্দেন কিং বোধ্যতে?

उत्तर : अत्र ईश्वरस्य शक्तिः तथा माया प्रकृतिशब्देन बोध्या।

উঃ অত্র ঈশ্বরস্য শক্তিঃ তথা মায়া প্রকৃতিশব্দেন বোধ্যা।

४१. 'प्रकृतिरष्टधा' —अष्टधा प्रकृतिः का अस्ति?

৪১. 'প্রকৃতিরষ্টধা'—অষ্টধা প্রকৃতিঃ কা অস্তি? ২০১৭

उत्तरः भूमिः आपः अनलः वायूः खम् (आकाशम्) मनः बुद्धिः अहङ्कारश्च इति अष्टधा विभाजिता ईश्वरस्य मायाशक्तिः।

উত্তর। ভূমিঃ আপঃ অনলঃ বায়ূঃ খম্ (আকাশম্) মনঃ বুদ্ধিঃ অহঙ্কারশ্চ ইতি অষ্টধা বিভাজিতা ঈশ্বরস্য মায়াশক্তিঃ।

४२. क्षेत्रं किम्?

৪২. ক্ষেত্রং কিম্?

उत्तरः जीवशरीरं क्षेत्रम्।

উত্তর। জীবশরীরং ক্ষেত্রম্।

४३. क्षेत्रस्य उपादानानि कानि सन्ति?

৪৩. ক্ষেত্রস্য উপাদানানি কানি সন্তি?

उत्तर : पञ्चमहाभूतानि, दशेन्द्रियाणि, पञ्चतन्मात्राणि, बुद्धिः अव्यक्तम् (मूला प्रकृतिः), अहङ्कारः मनश्च क्षेत्रस्य स्थूलदेहस्य उपादानानि सन्ति।

উত্তর। পঞ্চমহাভূতানি, দশেন্দ্রিয়াণি, পঞ্চতন্মাত্রাণি, বুদ্ধিঃ অব্যক্তম্ (মূলা প্রকৃতিঃ), অহঙ্কারঃ মনশ্চ ক্ষেত্রস্য স্থূলদেহস্য উপাদানানি সন্তি।

४४. क्षेत्रज्ञः कः भवति?

Scanned with CamScanner

৪৪. ক্ষেত্রজ্ঞঃ কঃ ভবতি?

उत्तर : क्षेत्रं जीवपुरुषं यः जानाति स क्षेत्रज्ञः तथा परमात्मा।

উত্তর। ক্ষেত্রং জীবপুরুষং যঃ জানাতি স ক্ষেত্রজ্ঞঃ তথা পরমাত্মা।

४५. 'निबध्नन्ति महावाहो'— 'महावाहो' सम्बोधनेन कः बोध्यः?

৪৫. 'নিবধ্নন্তি মহাবাহো'— 'মহাবাহো' সম্বোধনেন কঃ বোধ্যঃ?

उत्तर : महान्तौ वाहू यस्य सः महावाहुः तथा अर्जुनः।

উত্তর। মহান্তৌ বাহূ যস্য সঃ মহাবাহুঃ তথা অর্জুনঃ।

४६. 'निबध्नन्ति महावाहो'—के कं कुत्र निबध्नन्ति।

৪৬। 'নিবধ্নন্তি মহাবাহো'— কে কং কুত্র নিবধ্নন্তি।

उत्तर : सत्त्वगुणः रजस्तम इति गुणाः जीवात्मानं शरीरे निबध्नन्ति।

উঃ সত্ত্বগুণঃ রজস্তম ইতি গুণাঃ জীবাত্মানং শরীরে নিবধ্নন্তি।

४७. सत्त्वगुणः कीदृशः भवति?

৪৭। সত্ত্বগুণঃ কীদৃশঃ ভবতি? ২০১৯

उत्तर : सत्त्वगुणः निर्मलः प्रकाशकः अनामयश्च।

উঃ সত্ত্বগুণঃ নির্মলঃ প্রকাশকঃ অনাময়শ্চ।

४८. सत्त्वगुणस्य कार्यं किम्?

৪৮। সত্ত্বগুণস্য কার্যং কিম্? ২০১৯

उत्तर : सत्त्वगुणः सुखसङ्गेन ज्ञानसङ्गेन च जीवात्मानं देहे बन्धाति।

উঃ সত্ত্বগুণঃ সুখসঙ্গেন জ্ঞানসঙ্গেন চ জীবাত্মানং দেহে বধ্নাতি।

४९. रजोगुणः कीदृशः भवति?

৪৯। রজোগুণঃ কীদৃশঃ ভবতি?

उत्तर : रजोगुणः रागात्मकः तृष्णासङ्गसमुद्भवश्च।

উঃ রজোগুণঃ রাগাত্মকঃ তৃষ্ণাসঙ্গসমুদ্ভবশ্চ।

५०. रजोगुणस्य कार्यं किम्?

৫০। রজোগুণস্য কার্যং কিম্?

उत्तर : रजोगुणः कर्मसङ्गेन जीवात्मानं बध्नाति।

উঃ রজোগুণঃ কর্মসঙ্গেন জীবাত্মানং বধ্নাতি।

Scanned with CamScanner

५१. तमोगुणः कीदृशः भवति?

৫১. তমোগুণঃ কীদৃশঃ ভবতি?

उत्तर: तमोगुणः अज्ञानजः देहिनां मोहकारकश्च।

উত্তর। তমোগুণঃ অজ্ঞানজঃ দেহিনাং মোহকারকশ্চ।

५२. तमोगुणस्य कार्यं किं भवति?

৫২. তমোগুণস্য কার্যং কিং ভবতি?

उत्तर: तमोगुणः प्रमादेन आलस्येन निद्रया च देहिनं बध्नाति।

উত্তর। তমোগুণঃ প্রমাদেন আলস্যেন নিদ্রয়া চ দেহিনং বধ্নাতি।

५३. जीवशरीरे सत्त्वगुणस्य बृद्धिः कथम् उपलभ्यते?

৫৩. জীবশরীরে সত্ত্বগুণস্য বৃদ্ধিঃ কথম্ উপলভ্যতে?

उत्तर : जीवस्य देहे अन्तःकरणे च यदा ज्ञानशक्तेः उदयः भवति तदा सत्त्वगुणस्य बृद्धिः उपलभ्यते।

উত্তর। জীবস্য দেহে অন্তঃকরণে চ যদা জ্ঞানশক্তেঃ উদয়ঃ ভবতি তদা সত্ত্বগুণস্য বৃদ্ধিঃ উপলভ্যতে।

५४. जीवशरीरे रजोगुणस्य बृद्धिः कथं ज्ञायते? 2019

৫৪. জীবশরীরে রজোগুণস্য বৃদ্ধিঃ কথং জ্ঞায়তে?

उत्तर : जीवशरीरे यदा लोभकामनासक्तिनां प्रावल्यं दृश्यते तदा रजोगुणस्य बृद्धिः ज्ञायते।

উত্তর। জীবশরীরে যদা লোভকামনাসক্তিনাং প্রাবল্যং দৃশ্যতে তদা রজোগুণস্য বৃদ্ধিঃ জ্ঞায়তে।

५५. जीवशरीरे तमोगुणस्य बृद्धिः कथं ज्ञायते?

৫৫. জীবশরীরে তমোগুণস্য বৃদ্ধিঃ কথং জ্ঞায়তে?

उत्तर : कर्तव्यकर्मसु अप्रवृत्ति–उत्साहहीनता–निद्रा–आलस्यादीनां जागरणात् जीवदेहे तमोगुणस्य बृद्धिः ज्ञायते।

উত্তর। কর্তব্যকর্মসু অপ্রবৃত্তি-উৎসাহহীনতা-নিদ্রা-আলস্যাদীনাং জাগরণাৎ জীবদেহে তমোগুণস্য বৃদ্ধিঃ জ্ঞায়তে।

५६. सत्त्वगुणात् किं जायते?

৫৬। সত্ত্বগুণাৎ কিং জায়তে?

Scanned with CamScanner

उत्तर : सत्त्वगुणात् ज्ञानं जायते।

উঃ সত্ত্বগুণাৎ জ্ঞানং জায়তে।

५७. रजोगुणात् कः जायते?

৫৭। রজোগুণাৎ কঃ জায়তে?

उत्तर : रजोगुणात् लोभः जायते।

উঃ রজোগুণাৎ লোভঃ জায়তে।

५८. तमोगुणात् किं जायते?

৫৮। তমোগুণাৎ কিং জায়তে?

उत्तर : तमोगुणात् प्रमादमोहौ अज्ञानं च जायते।

উঃ তমোগুণাৎ প্রমাদমোহৌ অজ্ঞানং চ জায়তে।

५९. सञ्जयः कः आसीत्?

৫৯। সঞ্জয়ঃ কঃ আসীৎ?

उत्तर : सञ्जयः धृतराष्ट्रस्य वैमात्रेयभ्रातुः महात्मनः विदुरस्य पुत्रः तथा च धृतराष्ट्रस्य सारथिः।

উঃ সঞ্জয়ঃ ধৃতরাষ্ট্রস্য বৈমাত্রেয়ভ্রাতুঃ মহাত্মনঃ বিদুরস্য পুত্রঃ তথা চ ধৃতরাষ্ট্রস্য সারথিঃ।

६०. 'अहो वत महत्पापं कर्त्तुं व्यवसिताः वयम्'—कश्च वक्ता? महत् पापं किम्? के महत्पापं कर्त्तुं व्यवसिताः?

৬০। 'অহো বত মহৎপাপং কর্ত্তুং ব্যবসিতাঃ বয়ম্'—কশ্চ বক্তা? মহৎ পাপং কিম্? কে মহৎপাপং কর্ত্তুং ব্যবসিতাঃ?

उत्तर : वक्ता अर्जुनः। स्वजनवधः हि महत् पापम्। पाण्डवाः पापं कर्त्तुं व्यवसिताः।

উঃ বক্তা অর্জুনঃ। স্বজনবধঃ হি মহৎ পাপম্। পাণ্ডবাঃ পাপং কর্ত্তুং ব্যবসিতাঃ।

६१. 'नैतत् त्वय्युपपद्यते'—कः कं प्रति एवमुक्तवान्? तस्मिन् किं न उपपद्यते?

৬১. 'নৈতৎ ত্বয্যুপপদ্যতে'— কঃ কং প্রতি এবমুক্তবান্? তস্মিন্ কিং ন উপপদ্যতে?

उत्तर: श्रीकृष्णः अर्जुनं प्रति एवमुक्तवान्। अर्जुने हृदयदौर्वल्यं न उपपद्यते।

Scanned with CamScanner

উত্তর। শ্রীকৃষ্ণঃ অর্জুনং প্রতি এবমুক্তবান্। অর্জুনে হৃদয়দৌর্বল্যং ন উপপদ্যতে।

६२. 'क्लैव्यं मास्मगमः पार्थ!'— क्लैव्यं किम्?

৬২. 'ক্লৈব্যং মাস্মগমঃ পার্থ!'—ক্লৈব্যং কিম্?

उत्तर: क्लैव्यं क्लीवत्वम्। क्षुद्रं हृदयदौर्वल्यमेव क्लीवत्वम्।

উত্তর। ক্লৈব্যং ক্লীবত্বম্। ক্ষুদ্রং হৃদয়দৌর্বল্যমেব ক্লীবত্বম্।

६३. 'न त्वं वेत्थ परन्तप!'— 'परन्तपः' कः भवति? स किं न वे ?

৬৩. 'ন ত্বং বেত্থ পরন্তপ!'— 'পরন্তপঃ' কঃ ভবতি? স কিং ন বেত্তি?

उत्तर : परान् शत्रून् यः तापयति स परन्तपः तथा अर्जुनः। अर्जु
श्रीकृष्णस्य आत्मनः च जन्मान्तरं न वेत्ति।

উত্তর। পরান্ শত্রূন্ যঃ তাপয়তি স পরন্তপঃ তথা অর্জুনঃ। অর্জুনঃ ভগবতঃ শ্রীকৃষ্ণস্য অ...
চ জন্মান্তরং ন বেত্তি।

६४. मनसः स्वभावः कीदृशः भवति?

৬৪. মনসঃ স্বভাবঃ কীদৃশঃ ভবতি?

उत्तर : मनः स्वभावतः चञ्चलं प्रमाथी बलवत् दृढं च।

উত্তর। মনঃ স্বভাবতঃ চঞ্চলং প্রমাথী বলবৎ দৃঢ়ং চ।

६५. मनसः निग्रहं कीदृशम्?

৬৫. মনসঃ নিগ্রহং কীদৃশম্?

उत्तर : मनसः निग्रहं वायोरिव सुदुष्करम्।

উত্তর। মনসঃ নিগ্রহং বায়োরিব সুদুষ্করম্।

६६. मनसः नियन्त्रणं कथं सम्भवम्?

৬৬। মনসঃ নিয়ন্ত্রণং কথং সম্ভবম্?

उत्तर : अभ्यासेन वैराग्येण च मनसः नियन्त्रणं सम्भवम्।

উঃ অভ্যাসেন বৈরাগ্যেণ চ মনসঃ নিয়ন্ত্রণং সম্ভবম্।

६७. कः नाम अभ्यासः?

৬৭। কঃ নাম অভ্যাসঃ?

उत्तर : 'तत्र स्थितौ यत्नोऽभ्यासः'—पुनः पुनः चेष्टा एव अभ्यासः।

উঃ 'তত্র স্থিতৌ যত্নোঽভ্যাসঃ'—পুনঃ পুনঃ চেষ্টা এব অভ্যাসঃ।

Scanned with CamScanner

६८. वैराग्यं किम्?

৬৮। বৈরাগ্যং কিম্?

उत्तर : विषयभावनापरित्यागं हि वैराग्यम्।

উঃ বিষয়ভাবনাপরিত্যাগং হি বৈরাগ্যম্।

६९. ध्यानं नाम किम्?

৬৯। ধ্যানং নাম কিম্?

उत्तर : चित्तस्य एकाग्रता हि ध्यानम्।

উঃ চিত্তস্য একাগ্রতা হি ধ্যানম্।

७०. ध्यानं कुत्र साधनीयम्?

৭০। ধ্যানং কুত্র সাধনীয়ম্?

उत्तर : पवित्रस्थाने, निर्जनगुहायाम्, नदीसङ्गमे वा ध्यानं साधनीयम्।

উঃ পবিত্রস্থানে, নির্জনগুহায়াম্, নদীসঙ্গমে বা ধ্যানং সাধনীয়ম্।

७१. ध्यानस्य आसनं कीदृशं भवेत्?

৭১. ধ্যানস্য আসনং কীদৃশং ভবেৎ?

उत्तर: क्रमेण कुश-मृगचर्म-शुद्धवस्त्रेण च ध्यानस्य आसनं निर्मितं भवेत्।

উত্তর। ক্রমেণ কুশ-মৃগচর্ম-শুদ্ধবস্ত্রেণ চ ধ্যানস্য আসনং নির্মিতং ভবেৎ।

७२. आसनं कतिविधं भवति?

৭২. আসনং কতিবিধং ভবতি?

उत्तर: आसनं पञ्चविधम्—पद्मासनम्, स्वस्तिकासनम्, भद्रासनम्, वज्रासनम्, वीरासनञ्चेति।

উত্তর। আসনং পঞ্চবিধম্—পদ্মাসনম্, স্বস্তিকাসনম্, ভদ্রাসনম্, বজ্রাসনম্, বীরাসনঞ্চেতি।

७३. ध्यानस्य मुख्यं लक्ष्यं किमस्ति?

৭৩. ধ্যানস্য মুখ্যং লক্ষ্যং কিমস্তি?

उत्तर : आत्मविशुद्धिता।

উত্তর। আত্মবিশুদ্ধিতা।

७४. ध्यानकाले साधकस्य दृष्टिः कुत्र निबद्धा भवति?

৭৪. ধ্যানকালে সাধকস্য দৃষ্টিঃ কুত্র নিবদ্ধা ভবতি?

Scanned with CamScanner

उत्तर : नासिकाग्रे।

উত্তর। নাসিকাগ্রে।

७५. ध्यानकाले साधकः कीदृशः भवेत्?

৭৫. ধ্যানকালে সাধকঃ কীদৃশঃ ভবেৎ?

उत्तर : प्रशान्तात्मा, निर्भीकः, ब्रह्मचारिव्रते स्थितः तथा च संयतमना।

উত্তর। প্রশান্তাত্মা, নির্ভীকঃ, ব্রহ্মচারিব্রতে স্থিতঃ তথা চ সংযতমনা।

७६. अकर्मणा का प्रतिषिद्धा भवति?

৭৬। অকর্মণা কা প্রতিষিদ্ধা ভবতি?

उत्तर : शरीरयात्रा।

উঃ শরীরযাত্রা।

७७. कस्य योगः न सिद्धः भवति?

৭৭। কস্য যোগঃ ন সিদ্ধঃ ভবতি?

उत्तर : अत्यश्नतः अनश्नतः अतिस्वप्नशीलस्य जाग्रतः साधकस्य योगः न सिद्धः भवति।

উঃ অত্যশ্নতঃ অনশ্নতঃ অতিস্বপ্নশীলস্য জাগ্রতঃ সাধকস্য যোগঃ ন সিদ্ধঃ ভবতি।

७८. 'योगः भवति दुःखहा'—कस्य योगः दुःखहा भवति? 2019

৭৮। 'যোগঃ ভবতি দুঃখহা'—কস্য যোগঃ দুঃখহা ভবতি?

उत्तर : युक्ताहारविहारस्य युक्तचेष्टस्य युक्तस्वप्नावबोधस्य योगः दुःखहा भवति।

উঃ যুক্তাহারবিহারস্য যুক্তচেষ্টস্য যুক্তস্বপ্নাববোধস্য যোগঃ দুঃখহা ভবতি।

७९. आहारः कतिविधः भवति? के च ते?

৭৯। আহারঃ কতিবিধঃ ভবতি? কে চ তে?

उत्तर : आहारः त्रिविधः— सात्त्विकाहारः राजसिकाहारः तामसिकाहारश्च।

উঃ আহারঃ ত্রিবিধঃ—সাত্ত্বিকাহারঃ রাজসিকাহারঃ তামসিকাহারশ্চ।

८०. के च आहाराः सात्त्विकानां प्रियाः भवन्ति?

৮০। কে চ আহারাঃ সাত্ত্বিকানাং প্রিয়াঃ ভবন্তি?

Scanned with CamScanner

उत्तर : आयु: सत्त्ववलारोग्यसुखप्रीतिविबर्धना: ।
रस्या: स्निग्धा: स्थिरा: हृद्या: आहारा: सात्त्विकप्रिया: ।।

উঃ আয়ুঃ সত্ত্ববলারোগ্যসুখপ্রীতিবিবর্ধনাঃ।
রস্যাঃ স্নিগ্ধাঃ স্থিরাঃ হৃদ্যাঃ আহারাঃ সাত্ত্বিকপ্রিয়াঃ ।।

८१. के च आहारा: राजसिकानां प्रिया: भवन्ति?

৮১. কে চ আহারাঃ রাজসিকানাং প্রিয়াঃ ভবন্তি?

उत्तर: कटु-अम्ल-लवण-अतुष्ण-तीक्ष्ण-रुक्षविदाहिन: आहारा: राजसिकानां प्रिया: भवन्ति।

উত্তর। কটু-অম্ল-লবণ-অত্যুষ্ণ-তীক্ষ্ণ-রুক্ষবিদাহিনঃ আহারাঃ রাজসিকানাং প্রিয়াঃ ভবন্তি।

८२. राजसिकाहारा: कीदृशा: भवन्ति?

৮২. রাজসিকাহারাঃ কীদৃশাঃ ভবন্তি?

उत्तर: दु:खशोकामयप्रदा: ।

উত্তর। দুঃখশোকাময়প্রদাঃ।

८३. तप: कतिविधं भवति? कानि च तानि?

৮৩. তপঃ কতিবিধং ভবতি? কানি চ তানি?

उत्तर : तप: त्रिविधं भवति—शारीरं वाङ्मयं मानसञ्चेति। पुनश्च तप: सात्त्विकं राजसं तामसञ्चेति त्रिधा विभज्यते।

উত্তর। তপঃ ত্রিবিধং ভবতি— শারীরং বাঙ্ময়ং মানসঞ্চেতি। পুনশ্চ তপঃ সাত্ত্বিকং রাজসং তামসঞ্চেতি ত্রিধা বিভজ্যতে।

८४. शारीरं तप: किम्?

৮৪. শারীরং তপঃ কিম্?

उत्तर : देवद्विजगुरुप्राज्ञपूजनं शौचम् आर्जवम् ब्रह्मचर्यम् अहिंसा च शारीरं तप: ।

উত্তর। দেবদ্বিজগুরুপ্রাজ্ঞপূজনং শৌচম্ আর্জবম্ ব্রহ্মচর্যম্ অহিংসা চ শারীরং তপঃ।

८५. वाङ्मयं तप: किम्?

৮৫. বাঙ্ময়ং তপঃ কিম্?

उत्तर : अनुद्वेगकरं सत्यं प्रियं हितञ्च वाक्यं स्वाध्यायाभ्यसनं च वाङ्मयं तप: ।

উত্তর। অনুদ্বেগকরং সত্যং প্রিয়ং হিতঞ্চ বাক্যং স্বাধ্যায়াভ্যসনং চ বাঙ্ময়ং তপঃ।

Scanned with CamScanner

৮৬. मानसं तपः किम्?

৮৬। মানসং তপঃ কিম্?

उत्तर : मनसः प्रसन्नता शान्तभावः भगवच्चिन्तास्वभावः मनसः नियन्त्रणं भावसंशुद्धिश्च मानसं तपः।

উঃ মনসঃ প্রসন্নতা শান্তভাবঃ ভগবচ্চিন্তাস্বভাবঃ মনসঃ নিয়ন্ত্রণং ভাবসংশুদ্ধিশ্চ মানসং তপঃ।

৮৭. सात्त्विकं तपः किम्?

৮৭। সাত্ত্বিকং তপঃ কিম্?

उत्तर : परया श्रद्धया फलाकाङ्क्षावर्जितं तपः सात्त्विकं तपः।

উঃ পরয়া শ্রদ্ধয়া ফলাকাঙ্ক্ষাবর্জিতং তপঃ সাত্ত্বিকং তপঃ।

৮৮. राजसं तपः किम्?

৮৮। রাজসং তপঃ কিম্?

उत्तर : अहङ्कारवशेन मानमर्यादालाभार्थं साधितं तपः राजसं तपः।

উঃ অহঙ্কারবশেন মানমর্যাদালাভার্থং সাধিতং তপঃ রাজসং তপঃ।

৮৯. तामसिकं तपः किम्?

৮৯। তামসিকং তপঃ কিম্?

उत्तर : अज्ञानप्रसूतम् आत्मनः पीडादायकम् अन्येषां क्षतिसाधनार्थं साधितं तपः तामसिकं तपः।

উঃ অজ্ঞানপ্রসূতম্ আত্মনঃ পীড়াদায়কম্ অন্যেষাং ক্ষতিসাধনার্থং সাধিতং তপঃ তামসিকং তপঃ।

৯০. 'योगो दुष्प्रापः'—केन योगः दुष्प्रापः भवति?

৯০। 'যোগো দুষ্প্রাপঃ'— কেন যোগঃ দুষ্প্রাপঃ ভবতি?

उत्तर : यस्य मनः न वशीभूतं तेन असंयतात्मना योगः दुष्प्रापः भवति।

উঃ যস্য মনঃ ন বশীভূতং তেন অসংযতাত্মনা যোগঃ দুষ্প্রাপঃ ভবতি।

৯১. कः योगम् आप्तुं शक्यः?

৯১. কঃ যোগম্ আপ্তুং শক্যঃ?

Scanned with CamScanner

उत्तर: वश्यात्मा साधकः साधनयोगेन योगम् आप्तुं शक्यः।

উত্তর। বশ্যাত্মা সাধকঃ সাধনযোগেন যোগম্ আপ্তুং শক্যঃ।

९२. किं नाम निर्वेदम्?

৯২. কিং নাম নির্বেদম্?

उत्तर: विषयवैतृष्णं निर्वेदम्।

উত্তর। বিষয়বৈতৃষ্ণং নির্বেদম্।

९३. सर्वेषु पवित्रतमं किमस्ति?

৯৩. সর্বেষু পবিত্রতমং কিমস্তি?

उत्तर : ज्ञानं सर्वेषु पवित्रतमम्।

উত্তর। জ্ঞানং সর্বেষু পবিত্রতমম্।

९४. कश्च ज्ञानं लब्धुं समर्थः?

৯৪. কশ্চ জ্ঞানং লব্ধুং সমর্থঃ?

उत्तर : संयतेन्द्रियः तत्परः श्रद्धावान् व्यक्तिः ज्ञानं लब्धुं समर्थः।

উত্তর। সংযতেন্দ্রিয়ঃ তৎপরঃ শ্রদ্ধাবান্ ব্যক্তিঃ জ্ঞানং লব্ধুং সমর্থঃ।

९५. 'योगमातिष्ठोत्तिष्ठ भारत!'—भारतः कः भवति? कश्च योगः अत्र उद्दिष्टः?

৯৫. 'যোগমাতিষ্ঠোত্তিষ্ঠ ভারত!'— ভারতঃ কঃ ভবতি? কশ্চ যোগঃ অত্র উদ্দিষ্টঃ?

उत्तर : भरतवंशसम्भूतः अर्जुनः भारतः। अत्र निष्कामः कर्मयोगः उद्दिष्टः।

উত্তর। ভরতবংশসম্ভূতঃ অর্জুনঃ ভারতঃ। অত্র নিষ্কামঃ কর্মযোগঃ উদ্দিষ্টঃ।

९६. बुद्धिः कतिविधा भवति का च?

৯৬। বুদ্ধিঃ কতিবিধা ভবতি কা চ?

उत्तर : बुद्धिः त्रिविधा भवति—सात्त्विकी, राजसी तामसी चेति।

উঃ বুদ্ধিঃ ত্রিবিধা ভবতি—সাত্ত্বিকী, রাজসী তামসী চেতি।

९७. का नाम सात्त्विकी बुद्धिः?

৯৭। কা নাম সাত্ত্বিকী বুদ্ধিঃ?

उत्तर : मोक्षयोगस्य प्रवृत्तिम्-अप्रवृत्तिम्, कार्यम्-अकार्यम्, भयम्-अभयम्, बन्धं-मोक्षं च सम्यक् जानाति या बुद्धिः सा सात्त्विकी बुद्धिः।

উঃ মোক্ষযোগস্য প্রবৃত্তিম্-অপ্রবৃত্তিম্, কার্যম্-অকার্যম্, ভয়ম্-অভয়ম্, বন্ধং-মোক্ষং চ

Scanned with CamScanner

সম্যক্ জানাতি যা বুদ্ধিঃ সা সাত্ত্বিকী বুদ্ধিঃ।

९८. का तत्र राजसी बुद्धिः ?

৯৮। কা তত্র রাজসী বুদ্ধিঃ ?

उत्तर : या बुद्धिः धर्मम्-अर्धर्मम्, कार्यम्-अकार्यम्, सम्यक्तया न जानाति सा बुद्धिः राजसी बुद्धिः।

উঃ যা বুদ্ধিঃ ধর্মম্-অধর্মম্, কার্যম্-অকার্যম্, সম্যক্তয়া ন জানাতি সা বুদ্ধিঃ রাজসী বুদ্ধিঃ।

९९. का नाम तामसी बुद्धिः ? 2019

৯৯। কা নাম তামসী বুদ্ধিঃ ?

उत्तर : या बुद्धिःधर्मम् अधर्मरूपेण तथा च सर्वान् विषयान् विपरीतभावेन चिन्तयति सा बुद्धिः तामसी बुद्धिः।

উঃ যা বুদ্ধিঃ ধর্মম্ অধর্মরূপেণ তথা চ সর্বান্ বিষয়ান্ বিপরীতভাবেন চিন্তয়তি সা বুদ্ধিঃ তামসী বুদ্ধিঃ।

१००. कश्च योगी प्रसादमधिगच्छति ?

১০০। কশ্চ যোগী প্রসাদমধিগচ্ছতি ?

उत्तर : रागद्वेषवियुक्तः जितेन्द्रियश्च योगी प्रसादमधिगच्छति।

উঃ রাগদ্বেষবিযুক্তঃ জিতেন্দ্রিয়শ্চ যোগী প্রসাদমধিগচ্ছতি।

१०१. 'सांख्ये कृतान्ते'—सांख्यं किम् ?

১০১. 'সাংখ্যে কৃতান্তে'— সাংখ্যং কিম্ ?

उत्तर: परमर्षिकपिलप्रणीतं पञ्चविंशतितत्त्वयुक्तं दर्शनं सांख्यम्।

উত্তর। পরমর্ষিকপিলপ্রণীতং পঞ্চবিংশতিতত্ত্বযুক্তং দর্শনং সাংখ্যম্।

१०२. 'सांख्ये कृतान्ते'—कृतान्तं किम् ?

১০২. 'সাংখ্যে কৃতান্তে'—কৃতান্তং কিম্ ?

उत्तर: कर्मणाम् अवसानोपायज्ञापकं दर्शनं कृतान्तं तथा सांख्यदर्शनम्।

উত্তর। কর্মণাম্ অবসানোপায়জ্ঞাপকং দর্শনং কৃতান্তং তথা সাংখ্যদর্শনম্।

१०३. 'पञ्चैतानि महावाहो कारणानि'—पञ्चकारणानि कानि भवन्ति ? 2019

১০৩. 'পঞ্চৈতানি মহাবাহো কারণানি'— পঞ্চকারণানি কানি ভবন্তি ?

उत्तर : अधिष्ठानम्, कर्ता, पृथग्विधम् करणम्, विविधा चेष्टा, दैवम् इति पञ्चकारणानि।

উত্তর। অধিষ্ঠানম্, কর্তা, পৃথগ্বিধম্ করণম্, বিবিধা চেষ্টা, দৈবম্ ইতি পঞ্চকারণানি।

१०४. कर्म कतिविधम् किञ्च ?

১০৪. কর্ম কতিবিধম্ কিঞ্চ ?

उत्तर : कर्म त्रिविधम्—शारीरिकं वाचिकं मानसञ्चेति।

উত্তর। কর্ম ত্রিবিধম্— শারীরিকং বাচিকং মানসঞ্চেতি।

१०५. शारीरिकं कर्म किम् ?

১০৫. শারীরিকং কর্ম কিম্ ?

उत्तर : शरीरेण हस्तपादादिभिः साधितं कर्म शारीरिकं कर्म।

উত্তর। শরীরেণ হস্তপাদাদিভিঃ সাধিতং কর্ম শারীরিকং কর্ম।

१०६. वाचिकं कर्म किम् ?

১০৬। বাচিকং কর্ম কিম্ ?

उत्तर : वाचा वाक्येण साधितं कर्म वाचिकं कर्म।

উঃ বাচা বাক্যেণ সাধিতং কর্ম বাচিকং কর্ম।

१०७. मानसं कर्म किम् ?

১০৭। মানসং কর্ম কিম্ ?

उत्तर : मनसा साधितं कर्म मानसं कर्म।

উঃ মনসা সাধিতং কর্ম মানসং কর্ম।

१०८. 'स पश्यति दुर्मतिः'—दुर्मतिः कः भवति ?

১০৮। 'স পশ্যতি দুর্মতিঃ'—দুর্মতিঃ কঃ ভবতি ?

उत्तर : आत्मानं कर्तारूपेण यः पश्यति मालिन्यबुद्धियुक्तः स अज्ञानी 'दुर्मतिः'।

উঃ আত্মানং কর্তারূপেণ যঃ পশ্যতি মালিন্যবুদ্ধিযুক্তঃ স অজ্ঞানী 'দুর্মতিঃ'।

१०९. 'तत्त्ववित्' कः भवति ?

১০৯। 'তত্ত্ববিৎ' কঃ ভবতি ?

उत्तर : आत्मतत्त्वं यः जानाति स एव 'तत्त्ववित्'।

উঃ আত্মতত্ত্বং যঃ জানাতি স এব 'তত্ত্ববিৎ'।

Scanned with CamScanner

११०. 'समत्वं योग उच्यते'—समत्वं किम्?

১১০. 'সমত্বং যোগ উচ্যতে'—সমত্বং কিম্?

उत्तर: सिद्धौ असिद्धौ च समभावपोषणं हि समत्वम्।

উত্তর। সিদ্ধৌ অসিদ্ধৌ চ সমভাবপোষণং হি সমত্বম্।

१११. 'लोकसंग्रहः' शब्दस्य कोऽर्थः?

১১১. 'লোকসংগ্রহঃ' শব্দস্য কোঽর্থঃ?

उत्तर: लोकसंग्रहः नाम लोककल्याणम्।

উত্তর। লোকসংগ্রহঃ নাম লোককল্যাণম্।

११२. 'कार्पण्यदोषोपहतस्वभावः'—अत्र 'कार्पण्य' शब्दस्य कोऽर्थः?

১১২. 'কার্পণ্যদোষোপহতস্বভাবঃ'—অত্র 'কার্পণ্য' শব্দস্য কোঽর্থঃ?

उत्तर : कृपणस्य भावः कार्पण्यम्। अस्मिन् दुर्लभे मनुष्यजन्मनि यः परमात्मानम् अज्ञात्वा मनुष्यलोकं त्यजति स कृपणः।

উত্তর। কৃপণস্য ভাবঃ কার্পণ্যম্। অস্মিন্ দুর্লভে মনুষ্যজন্মনি যঃ পরমাত্মানম্ অজ্ঞাত্বা মনুষ্যলোকং ত্যজতি স কৃপণঃ।

११३. कस्मिन् विषये मनुष्याणाम् अधिकारः अस्ति कस्मिन् विषये च नास्ति?

১১৩. কস্মিন্ বিষয়ে মনুষ্যাণাম্ অধিকারঃ অস্তি কস্মিন্ বিষয়ে চ নাস্তি?

उत्तर : मनुष्याणां कर्मणि एव अधिकारः अस्ति किन्तु कर्मफेल नास्ति।

উত্তর। মনুষ্যাণাং কর্মণি এব অধিকারঃ অস্তি কিন্তু কর্মফলে নাস্তি।

११४. 'स मामेति'—कः केन उपायेन कं च एति?

১১৪. 'স মামেতি'—কঃ কেন উপায়েন কং চ এতি?

उत्तर : लोककल्याणकृत् लोककल्याणेन परमात्मानम् एति।

উত্তর। লোককল্যাণকৃৎ লোককল্যাণেন পরমাত্মানম্ এতি।

११५. 'स मम प्रियः'—कः कस्य प्रियः भवति?

১১৫। 'স মম প্রিয়ঃ'— কঃ কস্য প্রিয়ঃ ভবতি?

उत्तर : सर्वभूतेषु मैत्रः करुणः अहिंसः भक्तः ईश्वरस्य प्रियः भवति।

উঃ সর্বভূতেষু মৈত্রঃ করুণঃ অহিংসঃ ভক্তঃ ঈশ্বরস্য প্রিয়ঃ ভবতি।

Scanned with CamScanner

# लघूत्तरीयाः प्रश्नाः

१. 'श्रीमद्भगवद्गीता' शब्दस्य निर्वचनं किम्?

১. 'শ্রীমদ্ভগবদ্গীতা' শব্দস্য নির্বচনং কিম্?

उत्तर: 'श्री' शब्दः कल्याणवाचकः। ईश्वरसम्बन्धीया कथा 'भगवत्'। गै + क्त (आ) 'गीता'। अथ कल्याणमयी भागवती कथा या उत्तमरूपेण गीता भवति सा श्रीमद्भगवद्गीता।

अथ अमित बुद्धिना वेदव्यासेन उक्तः—

गीता सुगीता कर्त्तव्या किमन्यैः शास्त्रविस्तरैः।
या स्वयं पद्मनाभस्य मुखपद्माद्विनिसृता।।

উত্তর। 'শ্রী' শব্দঃ কল্যাণবাচকঃ। ঈশ্বরসম্বন্ধীয়া কথা 'ভগবৎ'। গৈ + ক্ত (আ) 'গীতা'। অথ কল্যাণময়ী ভাগবতী কথা যা উত্তমরূপেণ গীতা ভবতি সা শ্রীমদ্ভগবদ্গীতা।

অথ অমিতবুদ্ধিনা বেদব্যাসেন উক্তঃ—

গীতা সুগীতা কর্ত্তব্যা কিমন্যৈঃ শাস্ত্র বিস্তরৈঃ।
যা স্বয়ং পদ্মনাভস্য মুখপদ্মাদ্বিনিসৃতা।।

२. श्रीमद्भगवद्गीतायाः उत्सः कः भवति?

২. শ্রীমদ্ভগবদ্গীতায়াঃ উৎসঃ কঃ ভবতি?

उत्तर: अमितबुद्धिना वेदव्यासेन विरचितं अष्टादशपर्वसमन्वितं महाकाव्यं महाभारतम्। तस्य च महाभारतस्य भीष्मपर्वणि २५ तम अध्यायात् ४२ तम अध्याय पर्यन्तं श्लोकसमष्टिः श्रीमद्भगवद्गीता। क्षुद्रहृदयदौर्बल्येन समाच्छन्नम् अर्जुनं युद्धार्थे पुनः प्रवृत्तकरणाय श्रीभगवता अर्जुनं प्रति यत् उपदेशामृतं वर्षितं सा एव सप्तशतश्लोकात्मिका श्रीमद्भगवद्गीता। गीता अष्टादशाध्यायेषु विभक्ता।

উত্তর। অমিতবুদ্ধিনা বেদব্যাসেন বিরচিতং অষ্টাদশপর্বসমন্বিতং মহাকাব্যং মহাভারতম্। তস্য চ মহাভারতস্য ভীষ্মপর্বণি ২৫ তম অধ্যায়াৎ ৪২ তম অধ্যায় পর্যন্তং শ্লোকসমষ্টিঃ শ্রীমদ্ভগবদ্গীতা। ক্ষুদ্রহৃদয়দৌর্বল্যেন সমাচ্ছন্নম্ অর্জুনং যুদ্ধার্থে পুনঃ প্রবৃত্তকরণায় শ্রীভগবতা অর্জুনং প্রতি যৎ উপদেশামৃতং বর্ষিতং সা এব সপ্তশত শ্লোকাত্মিকা শ্রীমদ্ভগবদ্গীতা। গীতা অষ্টাদশাধ্যায়েষু বিভক্তা।